# भारतीयशिक्षापरम्परा

(न्यायदर्शनस्य परिप्रेक्ष्ये)

सन्दीप वसन्त जोशी
वरिष्ठशोधाध्येता
संस्कृतसंवर्धनप्रतिष्ठानम्
sandeep.joshi993@gmail.com

शिक्षणस्य द्विधा प्रवृत्तिः दृश्यते । आधिभौतिकं शिक्षणम् आध्यात्मिकं शिक्षणं च इति । शिक्षायाः उद्देश्यानि पश्यामः चेत् अपि शिक्षायाः द्विधा प्रवृत्तिः दृष्टिपथम् आयाति। सदाचारः, परम्परायाः रक्षणम्, यथार्थस्य ज्ञानस्य प्राप्तिः, मोक्षः इति एतादृशानि शिक्षायाः उद्देश्यानि पश्यामः चेत् एतानि परस्परपूरकाणि सन्ति इति दृश्यते । एतेषाम् उद्देश्यानां पूर्त्यै व्यवस्थापिता शिक्षा अध्येतुः आधिभौतिकं विकासम् आध्यात्मिकं विकासं साधयितुं समर्था भवति । जगतः यत् स्थूलम् इन्द्रियगोचरः रूपं दृश्यते तदेव आधिभौतिकम् इति कथ्यते यत् सूक्ष्मम् इन्द्रियातीतं रूपम् अस्ति तद् आध्यात्मिकम् इति कथ्यते ।

आधिभौतिकस्य विकासार्थम् आधिभौतिकानां तत्त्वानां ज्ञानं तथा आध्यात्मिकस्य विकासार्थम् आध्यात्मिकानां तत्त्वानां ज्ञानम् आवश्यकं भवति । न्यायवैशेषिकदर्शनयोः इदं द्विविधं ज्ञानं सुष्ठु प्रतिपादितम् अस्ति । न्यायवैशेषिकदर्शने परस्परपूरके स्तः । गङ्गेशोपाध्यायेन एतयोः समन्वयं कृत्वा नव्यन्यायस्य परम्परा आरब्धा। अतः अत्र 'न्यायदर्शनम्' इति अनेन न्यायवैशेषिकदर्शनयोः ग्रहणं कर्तव्यम्। न्यायदर्शने सप्त पदार्थाः उक्ताः। द्रव्य-गुण-कर्म-सामान्य-विशेष-समवाय-अभावाः। एतेषां पदार्थानां द्रव्यादीनां वा क्रमः एव शिक्षासूत्राणाम् उदाहरणत्वेन स्वीकर्तुं शक्यः।

## ➢ शिक्षासूत्राणि

**ज्ञातात् अज्ञातं प्रति** – पदार्थानाम् अस्मिन् क्रमे द्रव्यादीनां वर्णनम् आदौ आगतम् अस्ति । द्रव्येषु अपि पृथिवी, आपः, तेजः, वायुः, आकाशः, कालः, दिक्, आत्मा, मनः इति एवं क्रमः अस्ति । पृथिव्यादयः केचन पदार्थाः इन्द्रियगोचराः, अनुभवगम्याः सन्ति केचन इन्द्रियातीताः सन्ति । अर्थात् इन्द्रियगोचराणां ज्ञातानां पदार्थानां वर्णनम् आदौ कृत्वा ततः इन्द्रिय-अगोचराणाम् अज्ञातानां पदार्थानां वर्णनं कृतम् अस्ति। अतः एव 'ज्ञातात् अज्ञातं प्रति' इति सूत्रं प्रकटयति अयं क्रमः ।

**सुगमात् कठिनं प्रति** – उक्तक्रमानुसारं पृथिव्यादयः पदार्थाः ज्ञातुं सरलाः सन्ति तेषाम् अपेक्षया कालः दिक् आत्मा मनः च इति एतानि तु ज्ञातुं कठिनानि सन्ति। अतः क्रमः अयं 'सुगमात् कठिनं प्रति' इति सूत्रं प्रकटयति ।

**स्थूलात् सूक्ष्मं प्रति** – अस्मिन् क्रमे पृथिव्यादयः स्थूलपदार्थाः सन्ति। कालः दिक् आत्मा मनः च इति एतानि तु सूक्ष्माणि सन्ति, स्थूलपदार्थानां वर्णनं प्रारम्भे कृत्वा ततः सूक्ष्माणां वर्णनं कृतम् । अतः 'स्थूलात् सूक्ष्मं प्रति' इति सूत्रम् अयं क्रमः समर्थयति ।

**अनिश्चितात् निश्चितं प्रति** – इदं सूत्रम् 'अनिश्चितम् = अनित्यं, निश्चितं = नित्यम्' इति एवं प्रकारेण पश्यामः चेत् पृथिवी, आपः, तेजः, वायुः इति एते अनित्याः पदार्थाः सन्ति । परमाणवः, आकाशः, कालः, दिक्, आत्मा, मनः इति एते नित्याः पदार्थाः सन्ति । अनेन ज्ञायते यत् अयं क्रमः 'अनिश्चितात् निश्चितं प्रति' अथवा 'अनित्यात् नित्यं प्रति' इति सूत्रं प्रतिपादति ।

**प्रत्यक्षात् अप्रत्यक्षं प्रति** – इदं तु स्पष्टम् एव यत् पृथिवी आपः तेजः वायुः इति एते प्रत्यक्षपदार्थाः सन्ति । प्रत्यक्षाः नाम इन्द्रियगोचराः । आकाशः कालः दिक् आत्मा इति एते तु अप्रत्यक्षाः। अतः 'प्रत्यक्षात् अप्रत्यक्षं प्रति' इति सूत्रम् अत्र समर्थितं दृश्यते।

**अनुभवात् तर्कं प्रति** – पृथिव्यादयः पदार्थाः अनुभवगम्याः सन्ति इति पूर्वं प्रतिपादितम्। कालः दिक् आत्मा इत्यादयः तु तर्केण अवगन्तव्याः पदार्थाः सन्ति अतः अनुभावात् तर्कं प्रति इति सूत्रम् अस्मिन् क्रमे प्रतिपादितं भवति ।

**मूर्तात् अमूर्तं प्रति** – वैशेषिकदर्शनानुगुणं मूर्तत्वं नाम क्रियावत्वम् । पृथिवी जलं तेजः वायुः मनः इति एते मूर्ताः पदार्थाः सन्ति । अन्ये अमूर्ताः पदार्थाः सन्ति । तेषु पृथिवी आपः तेजः वायुः च इति एतेषां वर्णनम् आदौ अस्ति अतः मूर्ताद् अमूर्तं प्रति इति सूत्रम् अत्र दृश्यते ।

## ➢ पदार्थानां क्रमस्य औचित्यम्

**द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त पदार्थाः ।**

न्यायदर्शनानुगुणं जगति विद्यमानाः सर्वे अपि पदार्थाः एतेषु सप्तसु पदार्थेषु अन्तर्भवन्ति । अतः यः कोऽपि अध्येता यत्किमपि अध्येतुम् इच्छति चेत् तेन पदार्थानां ज्ञानम् अधिगन्तव्यं भवति । न्यायदर्शनानुगुणं प्रयुक्तः पदार्थानाम् अयं क्रमः किञ्चन वैशिष्ट्यम् आवहति । तत् पश्यामः ।

सप्तसु पदार्थेषु षट् भावपदार्थाः सन्ति अन्तिमः अभावः इति । अत्र प्रथमतः द्रव्यं प्रतिपादितम् अस्ति । यतो हि गुणः क्रिया सामान्यं विशेषः च इति एते द्रव्याश्रिताः पदार्थाः सन्ति । अर्थात् एतेषाम् आधारः द्रव्यम् अस्ति । अतः द्रव्यं प्रथमतः वर्णितम् । द्वितीयः पदार्थः गुणः । सर्वेषु द्रव्येषु गुणः भवति । गुणरहितं द्रव्यं नास्ति । अतः एव 'गुणाश्रयत्वं द्रव्यत्वमिति' द्रव्यस्य लक्षणं प्रतिपादितम् । अतः द्वितीयं स्थानं गुणस्य अस्ति। तृतीयः पदार्थः क्रिया । क्रिया अपि द्रव्यम् आश्रित्य तिष्ठति परंतु सर्वेषु द्रव्येषु क्रिया न भवति । यथा आकाशः द्रव्यं परंतु सः क्रियाहीनः अस्ति । अतः तृतीयं स्थानं क्रियायाः । चतुर्थः पदार्थः सामान्यम् । सामान्यं नाम जातिः। यथा मनुष्येषु मनुष्यत्वं, गोषु गोत्वम् इत्यादि । एतत् सामान्यं द्रव्ये गुणे क्रियायां च इति एतेषु त्रिषु अपि अस्ति । तदुत्तरद्रव्येषु तत् नास्ति अतः चतुर्थं स्थानं सामान्यस्य । पञ्चमः पदार्थः विशेषः । सामान्यं यथा अनेकमात्रवृत्तिः धर्मः अस्ति । तद्विरुद्धं विशेषः एकमात्रवृत्तिः धर्मः अस्ति । अतः पञ्चमं स्थानं विशेषस्य । षष्ठः पदार्थः अस्ति समवायः । समवायः नाम कश्चन सम्बन्धः । पूर्वम् उक्तं यत् गुणः क्रिया सामान्यं विशेषः इति एते द्रव्यम् आश्रित्य तिष्ठन्ति । परन्तु एते केन सम्बन्धेन द्रव्ये तिष्ठन्ति? इति प्रश्नः उदेति । तस्य उत्तरम् अस्ति समवायसम्बन्धेन इति। अतः षष्ठः पदार्थः समवायः उक्तः । अन्तिमः पदार्थः अभावः उक्तः । शिक्षा प्रक्रियायां यथा भावपदार्थानां ज्ञानम् आवश्यकं तथा अभावस्य अपि ज्ञानम् आवश्यकम् । अतः अन्तिमः अभावपदार्थः उक्तः।

## ➢ शिक्षामनोविज्ञानम्

## ➢ न्यायदर्शने आत्मनः स्वरूपं शिक्षाप्रक्रियायां तस्य स्थानम् ।

न्यायदर्शने 'ज्ञानाधिकरणमात्मा'[1] इति आत्मनः लक्षणं प्रतिपादितम् अस्ति । अर्थात् ज्ञानस्य आश्रयः आत्मा अस्ति। चतुर्विंशतिः गुणाः न्यायदर्शने प्रतिपादिताः । तत्र ज्ञानम् अपि एकः गुणः । गुणाश्रयत्वात् आत्मा द्रव्यम् अस्ति। न्यायदर्शने बुद्धिः, सुखं, दुःखम्, इच्छा, द्वेषः, प्रयत्नः, धर्मः, अधर्मः, भावनानामकः संस्कारः इति एते आत्मनः विशेषगुणाः उक्ताः। विशेषगुणः नाम तद्द्रव्यमात्रवृत्तिः अर्थात् तस्मिन् तस्मिन् द्रव्ये विद्यमानः गुणः। यथा गन्धः पृथिव्याः विशेषगुणः अस्ति। सः पृथिव्याम् एव तिष्ठति। एवमेव एते नव आत्मनः विशेषगुणाः सन्ति। तेषु धर्मः अधर्मः भावनानामकः संस्कारः इति एते अतीन्द्रियगुणाः सन्ति । मनसा एते गुणाः न गृह्यन्ते ।

[1] तर्कसङ्ग्रहः, प्रमेयपरिच्छेदः पृ.२७

अयम् आत्मा द्विविधः जीवात्मा परमात्मा च । परमात्मा सर्वज्ञः एकः एव। जीवः तु प्रतिशरीरं भिन्नः विभुः नित्यः च । विभुत्वात् सर्वव्यापकः अयम् आत्मा अस्ति। क्रियाराहित्यात् आत्मा अमूर्तद्रव्यम् अस्ति। 'अहं सुखी' 'अहं दुःखी' इत्याकारकस्य ज्ञानस्य प्रत्यक्षवेत्ता आत्मा एव । मनसः इन्द्रियैः सह सन्निकर्षात् यत् ज्ञानं जायते तत् संस्काररूपेण आत्मनि एव तिष्ठति । तस्य ज्ञानस्य आधारः आत्मा भवति। शिक्षामनोविज्ञानस्य दृष्ट्या अपि शिक्षाप्रक्रियायाम् आत्मनः विशिष्टं स्थानम् अस्ति। अयम् आत्मा एव चेतना। स एव मनः प्रेरयति । प्रेरितं मनः इन्द्रियद्वारा पदार्थान् प्राप्नोति । तदा पदार्थज्ञानं भवति । अतः आत्मा एव अध्येता इति वक्तुं शक्यते

## ➢ नवानाम् आत्मगुणानां शिक्षाप्रेरकनिबन्धनत्वम् ।

न्यायदर्शने चतुर्विंशतिः गुणाः उक्ताः। तेषु बुद्धिः, सुखम्, दुःखम्, इच्छा, द्वेषः, प्रयत्नः, अदृष्टम् (धर्माधर्मौ), भावना इति एते नव आत्मगुणाः सन्ति । तत्र बुद्धिः नाम ज्ञानम्। सर्वव्यवहारहेतुः गुणः ज्ञानं बुद्धिः[1] । ज्ञानं द्विविधं भवति। स्मरणात्मकम् अनुभवात्मकं च। अनुभवजन्यः संस्कारः स्मरणस्य कारणं भवति। बाल्ये वयसि अधीतं संस्काररूपेण आत्मनि तिष्ठति । उद्बुद्धः संस्कारः स्मरणं जनयति। आवर्षम् अधीतेषु विषयेषु परीक्षायां केचन विषयाः स्मर्यन्ते । प्रश्नपत्रिकायाः अनुसारं केचन संस्काराः उद्बुद्धाः भवन्ति । द्वितीयः गुणः अस्ति सुखम् । सर्वेषामनुकूलतया वेदनीयं सुखम्[2] इति सुखस्य लक्षणम् । 'इदं मे भूयात्' इत्याकारकः यः ज्ञानविषयः स एव सुखम्। भोजनेन सुखं प्राप्यते । अत्र भोजनं सुखसाधनभूतम् । तत् सुखार्थम् अपेक्ष्यते । परन्तु सुखं तु न अन्यार्थम् अपेक्ष्यते । अतः सुखम् आत्यन्तिकम् इष्टम् इति कथ्यते। अध्येतुः अध्ययने प्रवृत्तिः सुखार्थम् एव जायते । अध्ययनं कदाचित् साक्षात् सुखकरं कदाचित् परम्परया सुखकरं भवति । यथा काव्याध्ययनेन साक्षात् सुखप्राप्तिः जायते । लौकिकेन अध्ययनेन प्राप्तया वृत्त्या धनम् प्राप्यते ततः परम्परया सुखम् प्राप्यते । उक्तं च

विद्या ददाति विनयं विनयाद्याति पात्रताम् ।
पात्रत्वात् धनमाप्नोति धनात् धर्मं ततः सुखम्॥

एवं सुखम् इति गुणः शिक्षार्थिनम् अध्ययने प्रेरयति ।

आत्मनः तृतीयः गुणः अस्ति दुःखम् । सर्वेषां प्रतिकूलतया वेदनीयं दुःखम् ।[3] सुखविरुद्धः गुणः दुःखम् । सुखं यथा मनुष्यम् अध्ययने प्रेरयति तथैव मम दुःखं न स्यात् इति अपि भावना तम् अध्ययने प्रेरयति । सुखस्य प्राप्त्यर्थं मनुष्यः यथा प्रयतते तथा दुःखस्य निवृत्त्यर्थम् अपि प्रयतते। अतः दुःखस्य निवृत्तिः इति शिक्षायाः उद्देश्यम् अस्ति ।

चतुर्थः गुणः अस्ति इच्छा। इच्छा कामः ।[4] अविद्यमाने वस्तुनि मनुष्यस्य इच्छा भवति। जानाति, इच्छति, यतते इति चेतनानां क्रमः। मनुष्यस्य प्रथमम् इदं मम इष्टम् इति ज्ञानं भवति। ततः तत्प्राप्तुम् इच्छा जायते। ततः तदर्थं सः प्रयत्नं करोति। अतः यत्नस्य कारणम् अस्ति इच्छा। सङ्कल्पः अपि इच्छायाः भेदः। कृतसङ्कल्पः मनुष्यः ज्ञानस्य प्राप्तये प्रयत्नं करोति। अतः इच्छा शिक्षायाः प्रेरकं निबन्धनम् अस्ति। पञ्चमः आत्मनः गुणः अस्ति द्वेषः। क्रोधो द्वेषः[5] इति द्वेषस्य लक्षणम् उक्तम्। क्रोधः, द्रोहः, मन्युः, अक्षमा, अमर्षः इति एते द्वेषस्य भेदाः सन्ति। निषिद्धे कर्मणि द्वेषः धर्मं जनयति। विहिते कर्मणि द्वेषः अधर्मं जनयति। निषिद्धे कर्मणि द्वेषः विहितकर्मणः ज्ञानार्थं प्रेरकः भवति। अतः द्वेषः शिक्षायाः प्रेरकं निबन्धनम् अस्ति। षष्ठः गुणः प्रयत्नः। कृतिः प्रयत्नः ।[6] प्रयत्नः द्विविधः भवति। जीवनपूर्वकः इच्छाद्वेषपूर्वकः। सुप्तौ प्राणः अपानः इत्यादीनां वायूनां सञ्चारहेतुः प्रयत्नः जीवनपूर्वकः भवति। अन्नभक्षणस्य इच्छया जायमानः यत्नः इच्छापूर्वकः। मशकस्य दंशस्य द्वेषेण जायमानः प्रयत्नः द्वेषपूर्वकः। शिक्षार्थं विहितः प्रयत्नः

---

[1] तर्कसङ्ग्रहः, प्रमेयपरिच्छेदः पृ. ५९
[2] तर्कसङ्ग्रहः, प्रमेयपरिच्छेदः पृ.६४
[3] तर्कसङ्ग्रहः, प्रमेयपरिच्छेदः पृ.६५
[4] तर्कसङ्ग्रहः, प्रमेयपरिच्छेदः पृ. ६५
[5] तर्कसङ्ग्रहः, प्रमेयपरिच्छेदः पृ.६६
[6] तर्कसङ्ग्रहः, प्रमेयपरिच्छेदः पृ.६७

इच्छापूर्वकः भवति । प्रयत्नेन एव शरीरे क्रिया जायते । यत्नः, उत्साहः, संरम्भः इत एते प्रयत्नस्य पर्यायाः सन्ति । अयं प्रयत्नः एव शिक्षाफलस्य प्राप्तये हेतुः भवति । आत्मनः सप्तमः गुणः धर्मः अष्टमः च अधर्मः द्वयोः अपि अदृष्टम् इति पदेन अभिधानं भवति । विहितकर्मजन्यः धर्मः । निषिद्धकर्मजन्यः अधर्मः ।[1] धर्मः अर्थात् पुण्यम् । अधर्मः अर्थात् पापम् । शास्त्रविहितम् आचरणं धर्मस्य उत्पादकं भवति । तद्विरुद्धं च अधर्मस्य उत्पादकम् । सुखस्य अनुभवः धर्मस्य एव फलम् अस्ति । दुःखस्य अनुभवः अधर्मस्य फलम् । यथा उक्तं –धनात् धर्मं ततः सुखम् । अतः धर्मस्य सम्पादनं शिक्षायाः प्रेरकं निबन्धनम् भवति । आत्मनः नवमः गुणः अस्ति संस्कारः । संस्कारः त्रिविधः अस्ति । वेगः, भावना, स्थितिस्थापकः च । तत्र भावनानामकः संस्कारः आत्मनः विशेषगुणः अस्ति । अर्थात् सः आत्मनि एव तिष्ठति । स्मृतिहेतुः भावनासंस्कारः भवति । भावना अनुभवात् जायते । ज्ञानम्, दुःखम्, मदः, रोगः, दीर्घकालः इति एते भावनानामकं संस्कारं नाशयन्ति । भावनानामकः संस्कारः ज्ञानस्य अवधारणे हेतुः भवति । अयम् आत्ममात्रवृत्तिः अस्ति ।

एतेषु धर्मः अधर्मः भावनानामकः संस्कारः इति एते स्थायिनः गुणाः सन्ति । बुद्धिः, सुखम्, दुःखम्, इच्छा, द्वेषः, प्रयत्नः इति एते क्षणद्वयवर्तिनः सन्ति । एवं गुणविशिष्टः आत्मा शिक्षाप्रक्रियायाम् अध्येता भवति । मनुष्येण अधिगतं ज्ञानम् आत्मनि संस्काररूपेण तिष्ठति । अयं ज्ञानजन्यः संस्कारः जन्मजन्मान्तरेषु अनुवर्तते ।

## ➢ न्यायदर्शने मनसः स्वरूपं शिक्षाप्रक्रियायां तस्य कार्यम् ।

सुखाद्युपलब्धिसाधनमिन्द्रियं मनः । तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यं च ।[2] इति मनसः लक्षणं न्यायदर्शने उक्तम् । सुखदुःखादीनां यत् प्रत्यक्षं भवति तस्य साधनं करणं यत् इन्द्रियं तत् मनः इति कथ्यते । मनसः स्वरूपं ज्ञातुम् आदौ इन्द्रियं नाम किम् इति ज्ञातव्यं भवति । प्रत्यक्षज्ञानकरणमतीन्द्रियम् इन्द्रियम् ।[3] इति इन्द्रियस्य लक्षणम् अस्ति । अर्थात् प्रत्यक्षज्ञानस्य यत् साधनं भवति तत् इन्द्रियम् । इन्द्रियं द्विविधं बाह्यम् आभ्यन्तरं च । तत्र घ्राणम्, रसना, चक्षुः, त्वक्, श्रोत्रं च इति एतानि बाह्येन्द्रियाणि सन्ति । मनः आन्तरम् इन्द्रियम् । रूपं रसः गन्धः स्पर्शः शब्दः च इति बाह्येन्द्रियग्राह्याः गुणाः सन्ति । एते गुणाः 'प्रतिनियतग्राह्याः' इति कथ्यन्ते । तेषाम् एकैकस्य गुणस्य ग्राहकम् एकैकम् इन्द्रियं भवति । रूपस्य ग्राहकं चक्षुः, रसस्य रसनम्, गन्धस्य घ्राणम्, स्पर्शस्य त्वक्, शब्दस्य श्रोत्रम् इति । आत्मनः ज्ञानादयः षड् गुणाः मनसा गृह्यन्ते । रूपादीनां प्रत्यक्षं यथा चक्षुरादिभिः जायते तद्वत् सुखादिविषयाणां प्रत्यक्षं केनचित् जायेत अतः तदर्थं मनः अनुमीयते । बहिरिन्द्रियाणि यथा घटादीन् प्रकाशयन्ति तथा मनः आत्मानं तद्गतान् गुणान् च प्रकाशयति । कानिचन इन्द्रियाणि गुणमात्रग्राहकाणि कानिचन द्रव्यगुणोभयग्राहकाणि सन्ति । मनः द्रव्यगुणोभयग्राहकम् इन्द्रियम् अस्ति । जीवात्मा प्रतिशरीरं भिन्नः । एवं सर्वेषाम् आत्मनां सुखदुःखादीनां ग्रहणम् एकेन एव मनसा न शक्यम् । अतः तस्य अनेकत्वं स्वीकृतम् । परमाणुरूपत्वात् तत् नित्यम् ।

## ➢ ज्ञानोत्पत्तौ मनसः कार्यम्

'अहं सुखी, अहं दुःखी, अहं जानामि, अहम् इच्छामि' इत्याकारकं यत् ज्ञानं भवति तत् मानसप्रत्यक्षम् इति उच्यते । चक्षुरादीनाम् इन्द्रियाणां द्वारा यः अनुभवजन्यः संस्कारः जायते तस्य सहकारेण मनः स्मरणात्मकं ज्ञानम् उत्पादयति । यथा 'सः घटः तत्र आसीत्' इति । आत्मगुणानां प्रत्यक्षकरणे यथा मनः कारणं भवति तथा बाह्येन्द्रियैः जननीये ज्ञाने मनः सहकारि भवति । आत्मा मनसा संयुज्यते । मनः तत्तदिन्द्रियैः संयुज्यते । इन्द्रियाणि अर्थैः सह संयुज्यन्ते । ततः बाह्येन्द्रियैः ज्ञानम् उत्पद्यते । मनसः अणुत्वे तस्य बहुभिः इन्द्रियैः सह युगपत् संयोगस्य असम्भवात् यदा मनः येन इन्द्रियेण संयुक्तं भवति तदीयम् एकमेव ज्ञानं मनसा जनिष्यते । अतः मनसः अन्यत्र व्यापृतत्वात् चक्षुः स्वविषयैः सन्निकृष्टम् अपि कदाचित् ज्ञानं न उत्पादयति । कक्ष्यायां पाठं शृण्वन् छात्रः मनसः अन्यत्र व्यापृतत्वात् श्रुतं न गृह्णाति । एकस्मिन् क्षणे एव इन्द्रियद्वयेन ज्ञानं न उत्पद्यते । श्रवणकाले श्रोत्रेण संयुक्तं मनः चक्षुषा न संयुज्यते । अतः मनसः

[1] तर्कसङ्ग्रहः, प्रमेयपरिच्छेदः पृ.६७

[2] तर्कसङ्ग्रहः, प्रमेयपरिच्छेदः पृ.२९

[3] तर्कप्रवेशः गौतमसरणिः

अणुत्वं स्वीकृतम् । चलच्चित्रादिदर्शने दर्शनश्रवणयोः यत् युगपत् ज्ञानं भवति तत् तु आशुभावापन्नप्रतीतित्वात् अर्थात् क्रमस्य शीघ्रतायाः कारणात् । यद्यपि क्रमशः ज्ञानम् इदं जायते तथापि आशुभावित्वात् तत्र क्रमः न गृह्यते ।

मनः सुषुप्तिकाले पुरीतन्नाडीं प्रविशति । पुरीतद्बहिर्देशावच्छेदेन आत्ममनसोः संयोगः ज्ञानस्य कारणं भवति । निद्राकाले एतादृशस्य संयोगस्य अभावात् ज्ञानं न उत्पद्यते ।

शिक्षाप्रक्रियायां मनसः अनितरसाधारणं महत्त्वम् अस्ति । यथा बाह्यविषयाणां तद्वदेव आभ्यन्तरविषयाणां प्रत्यक्षीकरणे मनः कारणं भवति । एकाग्रं मनः दुर्लभं ज्ञानम् अधिगन्तुं समर्थं भवति ।

## ➢ न्यायदर्शने प्रमाणानि शिक्षाप्रक्रियायां तेषां महत्त्वम्

न्यायशास्त्रानुगुणं शिक्षाप्रक्रियायाः चत्वारः अंशाः प्रधानाः भवन्ति प्रमाता, प्रमेयः, प्रमाणम्, प्रमितिः । छात्रः, जिज्ञासुः एव प्रमाता इति कथ्यते । ज्ञेयविषयः प्रमेयः इति कथ्यते । येन ज्ञानप्राप्तिः भवति तत् साधनमेव प्रमाणम् इति कथ्यते । प्रमाणादिभिः प्राप्तं यथार्थज्ञानं प्रमितिः कथ्यते । न्यायदर्शने प्रमाणानां तेषां विभिन्नानाम् अङ्गानां विस्तृतं वर्णनं प्राप्यते ।

प्रमाकरणं प्रमाणम् । प्रमा नाम यथार्थज्ञानम् । यथार्थज्ञानं येन जायते तत् प्रमाणम् इति उच्यते । न्यायदर्शने चत्वारि प्रमाणानि स्वीकृतानि । प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दः च । चतुर्भिः प्रमाणैः प्राप्तं यथार्थज्ञानम् अपि चतुर्धा विभक्तम् । प्रत्यक्षम्, अनुमितिः, उपमितिः, शाब्दः ।

### ❖ प्रत्यक्षम्

तत्र प्रत्यक्षप्रमाकरणं प्रत्यक्षम् । इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् ।[1] 'अयं घटः' इति ज्ञानं प्रत्यक्षम् । तस्य प्रमाणं चक्षुरिन्द्रियम् अपि प्रत्यक्षम् इति कथ्यते । इन्द्रियं प्रमायाः करणम् इत्युच्यते । व्यापारेण सहितम् असाधारणं कारणं करणम् इति कथ्यते । सन्निकर्षः व्यापारः इति उच्यते । यावत् चक्षुषः सन्निकर्षः न भवति तावत् पुरतः विद्यमानस्य घटस्य ज्ञानं न भवति । प्रथमं चक्षुः ततः घटेन सन्निकर्षः ततः ज्ञानम् इति अयं प्रत्यक्षज्ञानस्य क्रमः भवति ।

प्रत्यक्षज्ञानं द्विविधं भवति सविकल्पकं निर्विकल्पकं च इति । 'नीलो घटः' इति अस्मिन् ज्ञाने 'नीलः' विशेषणम् अस्ति । स एव ज्ञाने प्रकारः कथ्यते । प्रकारस्य एव शास्त्रे विकल्प इति संज्ञा भवति । अतः प्रकारेण विकल्पेन सहितं यत् ज्ञानं तत् सविकल्पकं ज्ञानं कथ्यते । यस्मिन् ज्ञाने विशेषणविशेष्ययोः सम्बन्धः न भासते तत् निर्विकल्पकं ज्ञानं कथ्यते । न्यायशास्त्रानुसारं सविकल्पकज्ञानात् पूर्वं निर्विकल्पकं ज्ञानं भवति । विकल्पाः नानाविधाः सन्ति । नामविकल्पः यथा रामः अयम् । गुणविकल्पः यथा शुक्लः अयम् । जातिविकल्पः यथा ब्राह्मणः अयम् । क्रियाविकल्पः यथा पाचकः अयम् । एतादृशानि ज्ञानानि सविकल्पानि सन्ति ।

### ❖ अनुमानम्

अनुमितिकरणमनुमानम् । परामर्शजन्यज्ञानमनुमितिः ।[2] अनुमितिः इति प्रमा । तस्याः साधनम् अनुमानम् । अत्र परामर्शः व्यापारः । अर्थात् परामर्शद्वारा यत् अनुमितिम् उत्पादयति तत् अनुमानम् । अनु इति उपसर्गस्य पश्चात् इति अर्थः मा धातोः ज्ञानम् इति अर्थः । अतः अनुमानम् इति अस्य पश्चात् (ज्ञानोत्तरं) जायमानस्य ज्ञानस्य करणम् इति अर्थः भवति ।

वह्निधूमयोः साहचर्यसम्बन्धः अस्माभिः बहुधा दृष्टः अतः धूमं दृष्ट्वा पर्वते वह्नेः अनुमानं क्रियते । अर्थात् 'पर्वतो वह्निमान्' इति ज्ञानं जायते । इदं ज्ञानं परामर्शात् जायते । परामर्शः इति पारिभाषिकं पदम् । अस्मिन् ज्ञाने धूमः हेतुः भवति । पर्वतः पक्षः इति कथ्यते । वह्निना सह धूमस्य व्याप्तिः अस्ति । धूमः पक्षे अर्थात् पर्वते अस्ति । अतः 'वह्निव्याप्यधूमवान् अयं पर्वतः' इति ज्ञानं भवति । एतद् ज्ञानम् एव परामर्शः इति कथ्यते । एतस्मात् जातं पर्वतो वह्निमान् इति ज्ञानम् अनुमितिः कथ्यते । अनुमानं द्विविधम् । स्वार्थं परार्थं च । येन

[1] तर्कसङ्ग्रहः प्रमाणपरिच्छेदः पृ.९१

[2] तर्कसङ्ग्रहः प्रमाणपरिच्छेदः पृ.१०१

अनुमानेन साध्ये सन्दिहानस्य पुरुषस्य साध्यनिश्चयरूपः अर्थः सिद्ध्यति तत् स्वार्थानुमानम् । परं प्रति प्रबोधकं वाक्यं परार्थानुमानं कथ्यते । पञ्चावयवयुक्तं वाक्यं परार्थानुमाने प्रयुज्यते । प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः ।[1] यथा छात्रः बुद्धिमान् इति प्रतिज्ञा । अध्ययनशीलत्वात् इति हेतुः । यः अध्ययनशीलः सः बुद्धिमान् । यथा अन्यः छात्रः इत्युदाहरणम् । तथा चायम् इत्युपनयः । तस्मात् अयं छात्रः बुद्धिमान् इति निगमनम् ।

शिक्षणे अनुमानस्य महत्वपूर्णं स्थानम् अस्ति । वयं जीवने प्रतिदिनम् अनुमानस्य उपयोगं कुर्मः । यथा यानस्य सङ्ख्यां दृष्ट्वा तस्य गमनस्थलस्य अनुमानम् । विशिष्टेन गन्धेन पदार्थस्य अनुमानम् । आर्द्रां भूमिं दृष्ट्वा वृष्टेः अनुमानम् । वैज्ञानिकस्य प्रयोगस्य सन्दर्भे तु अनुमानस्य महत्त्वपूर्णं स्थानम् अस्ति ।

### ❖ उपमानम्

उपमितिकरणम् उपमानम् ।[2] सञ्ज्ञा-सञ्ज्ञिसम्बन्धज्ञानम् उपमितिः । तत्करणं सादृश्यज्ञानम् । सञ्ज्ञा नाम शब्दः सञ्ज्ञी नाम अर्थः । तयोः सम्बन्धः शक्तिः इति कथ्यते । शक्तेः ज्ञानम् एव उपमितिः । उपमितिः येन जायते तत् उपमानम् । उपमितिः सादृश्यज्ञानात् जायते । अतः सादृश्यज्ञानम् उपमानम् ।

कश्चन छात्रः व्याघ्रं न जानाति अध्यापकः तं मार्जारं दर्शयित्वा 'तत्सदृशः किन्तु बृहत्कायः व्याघ्रः भवति' इति वदति । छात्रः कदाचित् मृगालयं गत्वा व्याघ्रं दृष्ट्वा अध्यापकेन उक्तं स्मरति । 'अयं व्याघ्रः' इति जानाति । इयम् एव उपमितिः ।

### ❖ शब्दः

आप्तवाक्यं शब्दः । आप्तस्तु यथार्थवक्ता । वाक्यं तु पदसमूहः ।[3] शब्दात् जायमानः बोधः शाब्दबोधः । तस्य करणं शब्दज्ञानम् । पदार्थस्मृतिः व्यापारः । प्रथमं शब्दः श्रूयते । ततः तस्य अर्थस्य स्मरणं भवति । ततः स्मृतयोः अर्थयोः सम्बन्धज्ञानं भवति । सः शाब्दबोधः इति उच्यते । शाब्दबोधे पदज्ञानं करणम् । सर्वः अपि शब्दः प्रमाणं न भवति । अतः अज्ञेन उच्चारितं शीतो वह्निः इति वाक्यं न प्रमाणम् । आप्तेन उच्चारितं प्रमाणं भवति । आप्तः यथार्थवक्ता भवति । स विपरीतं न वदति ।

अदृष्टस्य देशस्य आप्तात् श्रुतेन वर्णनेन जातं ज्ञानं शाब्दबोधः एव । तथैव विद्यालये अध्यापकात् श्रुतात् शब्दात् जातं ज्ञानं शाब्दबोधः ।

एवं चत्वारि प्रमाणानि न्यायदर्शने उक्तानि । विभिन्नैः दार्शनिकैः स्वीकृतानां प्रमाणानां सङ्ख्या असमाना अस्ति । नव्यनैयायिकाः तु उपमानस्य अन्तर्भावम् अनुमाने कुर्वन्ति । अतः नव्यनैयायिकानां मते त्रीणि प्रमाणानि । प्रमाणैः प्रमाणितं ज्ञानम् एव यथार्थज्ञानं कथ्यते । अतः शिक्षाप्रक्रियायां प्रमाणपुरःसरस्य अध्यापनस्य आवश्यकता वर्तते । शिक्षाशास्त्रे प्रतिपादिताः केचन विधयः एतानि प्रमाणानि पुरस्कुर्वन्ति । यथा प्रत्यक्षविधिः प्रत्यक्षप्रमाणं पुरस्करोति । तर्कविधिः अनुमानप्रमाणं पुरस्करोति । प्राचीनेषु दर्शनग्रन्थेषु तर्कविधेः उपयोगः आधिक्येन कृतः दृश्यते । व्याख्यानविधिः शब्दप्रमाणं पुरस्करोति । व्याकरणशिक्षणे उपमानप्रमाणं पुरस्कृतं दृश्यते । एवं शिक्षाप्रक्रियायां प्रमाणानाम् अत्यन्तं महत्त्वम् अस्ति ।

## ➢ न्यायदर्शने शाब्दबोधः

शीक्षां व्याख्यास्यामः । वर्णः स्वरः । मात्रा बलम् । साम सन्तानः । इत्युक्तः शीक्षाध्यायः ।[4] इति यथा तैत्तिरीयोपनिषदि उक्तं तदनुसारं वर्णः पदं वाक्यम् इति एतेषां ज्ञानं शिक्षा कथ्यते । पदार्थज्ञानं कथं भवति इति अस्मिन् सन्दर्भे न्यायदर्शने शाब्दबोधविचारः आगतः ।

[1] तर्कसङ्ग्रहः प्रमाणपरिच्छेदः पृ.११३
[2] तर्कसङ्ग्रहः प्रमाणपरिच्छेदः पृ.१४०
[3] तर्कसङ्ग्रहः प्रमाणपरिच्छेदः पृ.१४१
[4] तैत्तिरीयोपनिषद् १ ।२।१

'शक्तं पदम्'[1] इति पदस्य लक्षणम् उक्तम् । न्यायदर्शनानुसारं शक्तिः नाम ईश्वरेच्छा । 'अस्मात् पदादयमर्थो बोद्धव्यः' इतीश्वरसङ्केतः शक्तिः । ईश्वरः सर्गप्रारम्भे पदार्थान् निर्माय अस्य अर्थस्य अयं शब्दः वाचकः भवतु इति इच्छां करोति । अतः पदपदार्थयोः सम्बन्धः ईश्वरस्य इच्छया भवति । अतः ईश्वरेच्छा शक्तिः कथ्यते । यथा गौः इति शक्तं पदम् । सास्नादिमान् प्राणिविशेषः तस्य अर्थः । गोपदस्य गौः इति पदार्थस्य च सम्बन्धः शक्तिः । क्वचित् शब्दस्य मुख्यार्थं त्यक्त्वा अन्यः अर्थः स्वीक्रियते तत्र शक्तिः न स्वीक्रियते । तत्र लक्षणा सम्बन्धः भवति । अर्थः लक्ष्यः इत्युच्यते । यथा कुन्ताः प्रविशन्ति इति अत्र कुन्तधारिणः पुरुषाः स्वीक्रियन्ते । अयम् अर्थः लक्षणया स्वीक्रियते ।

न्यायदर्शने पदपदार्थयोः सम्बन्धः द्विविधः उक्तः शक्तिः लक्षणा च । तत्र शक्त्यर्थः मुख्यः लक्ष्यार्थः अमुख्यः कथ्यते । एवं शक्त्या लक्षणया वा पदार्थज्ञानं भवति । वाक्यार्थज्ञाने तु कश्चन हेतुः उक्तः । आकाङ्क्षा, योग्यता, सन्निधिः च इति एते त्रयः मिलित्वा हेतुः कथ्यते । वाक्यार्थज्ञाने अन्वयबोधः आवश्यकः । अन्वयबोधार्थम् एतेषां त्रयाणाम् आवश्यकता भवति । यथा 'धेनुः' इति अनेन पदार्थस्य स्मरणमात्रं भवति अन्वयबोधः न जायते । 'धेनुः गच्छति' इति उभयोः पदयोः सम्बन्धः भासते । तथैव धेनुः अश्वः गजः पुरुषः इति अनेकपदानां सत्त्वे अपि अन्वयबोधः न भवति । अतः शाब्दबोधार्थम् अन्वययोग्यं पदं कारणं भवति । इयमेव आकाङ्क्षा इति उच्यते । अस्मिन् उदाहरणे धेनुः इति पदस्य गच्छति इति पदेन आकाङ्क्षा भवति । शाब्दबोधार्थं यथा आकाङ्क्षा तथैव योग्यता अपि आवश्यकी । 'वह्निना सिञ्चति' इति अस्मिन् वाक्ये अर्थः बाधितः अस्ति । प्रत्यक्षादिविरुद्धः अर्थः बाधितः कथ्यते । सेचनक्रियायोग्यता वह्नेः नास्ति । अतः योग्यतायाः आभावात् शाब्दबोधः न भवति । शाब्दबोधार्थं सन्निधेः अपि आवश्यकता वर्तते । सन्निधिः नाम सान्निध्यम् । एतत् सान्निध्यं कालतः अपेक्ष्यते । कालव्यवधानेन रहितानि पदानि एव अन्वयबोधे समर्थानि भवन्ति । 'रामः पठति' इति अस्मिन् वाक्ये रामपदात् प्रहरान्तरे उच्चारितं पठति इति पदं शाब्दबोधं न जनयति । अतः पदानां सान्निध्यम् आवश्यकम् । एवम् आकाङ्क्षा योग्यता सन्निधिः च इति एते त्रयः शाब्दबोधे हेतुः भवति । एतेषु एकस्य अभावे अपि शाब्दबोधः न जायते ।

नैयायिकाः वाक्यं द्विविधं स्वीकुर्वन्ति । तत् वैदिकं लौकिकं च इति । तत्र ईश्वरोक्तत्वात् वैदिकं वाक्यं प्रमाणम् । लौकिकं तु आप्तोक्तं प्रमाणम् मन्यन्ते ।

## ➢ न्यायदर्शने पाठ्यक्रमः

यद्यपि न्यायदर्शने पाठ्यक्रमस्य विषये साक्षात् न उक्तं तथापि विषयनिरूपणस्य प्रकारं दृष्ट्वा पाठ्यक्रमः कीदृशः भवेत् इति अवगन्तुं शक्नुमः । तर्कसङ्ग्रहः इति न्यायशास्त्रस्य मुखग्रन्थः अस्ति । अस्मिन् ग्रन्थे विषयनिरूपणस्य क्रमः उद्देशः, लक्षणं, विभागः, परीक्षा इति एवं निरूपितः अस्ति । उद्देशग्रन्थे पदार्थानां नाम्ना सङ्कीर्तनं भवति । लक्षणग्रन्थे कीर्तितानां पदार्थानाम् असाधारणधर्मः उक्तः भवति । विभागग्रन्थे लक्षितानां पदार्थानां विभागः क्रियते । अन्ते परीक्षाग्रन्थे पदार्थानाम् उक्तं लक्षणं युक्तं वा अयुक्तं वा इति परीक्ष्यते ।

अनेन क्रमेण निर्मितः पाठ्यक्रमः छात्राणां कृते उपकारकः भवति । अयं क्रमः सुगमात् कठिनं प्रति इति शिक्षासूत्रम् अपि समर्थयति ।

शिक्षाशास्त्रसम्बद्धानाम् अनेकेषां विषयाणां प्रतिपादनम् अस्मिन् दर्शने दृश्यते ।

[1] तर्कसङ्ग्रहः प्रमाणपरिच्छेदः पृ.१४२

**सन्दर्भग्रन्थाः**


- ईशादि नौ उपनिषद् - सं हरिकृष्णदास गोयन्दका, गीताप्रेस गोरखपुर, २०१०
- तर्कप्रवेशः - व. नवीन होळ्ळः, संस्कृतसंवर्धनप्रतिष्ठानम्, देहली २०१८
- तर्कसङ्ग्रहः (तर्कसोपानम्) - हरिदासभट्ट अद्यपाडि, कर्नाटकसंस्कृतविश्वविद्यालयः, बेंगलुरु २०१३
- विद्याधरी - डा. देवदत्त गोविन्द पाटील, समर्थमीडियासेन्टर, पुणे २०१४